04

# HIGHER SECONDARY EDUCATION

## First Terminal Examination-2017-18

### Second Language Part - II

### SANSKRIT

STD - XII

Total Score : 80
Time : 2 ½ Hours

## निर्देशाः

- प्रश्नानाम् उत्तराणि निर्देशानुसारं लिखत ।
- प्रश्नान् प्रश्ननिर्देशान् च सावधानं पठित्वा उत्तरयत।
- प्रश्नानां वाचनाय १५ निमेषाः कल्पिताः।

---

**I अधोनिर्दिष्टेषु प्रश्नेषु पञ्चप्रश्नानामुत्तरं कोष्ठकात् निर्धार्य लिखत।** **(5 x 1 = 5)**

1. गीतगोविन्दस्य कर्ता कः?

   (कालिदासः, वेदव्यासः, जयदेवः)

2. मलयजपङ्कं विषमिव पश्यति - का?

   (सखी, राधा, शारिका)

3. तक्षकेनानुष्ठितं व्रतं किम्?

   (अहिंसा, असिधारा, एकादशी)

4. ................ करवस्त्रेण मुखं मार्जयति?

   (रोसी, माता, पुत्रः )

5. पितरौ कृतज्ञतापूर्वं .............. अनमताम् ।

   ( वृक्षराजम्, तापसीम्, शारिकाम् )

6. कः गणे न अन्तर्भवति ?

   ( केशवः, कन्दर्पः, शारिका )

7. शुद्धं वाक्यं चित्वा लिखत ।

   तेन मुनिना ताबोरद्रेरधित्यकां नीतः ।

   तेन मुनिना ताबोरद्रेरधित्यकां आनीतः ।

**II. अधोनिर्दिष्टयोः प्रश्नयोः एकस्य उत्तरं निर्देशानुसारं लिखत ।** **(1 x 6 = 6)**

**क) प्रदत्तेषु गीतेषु इष्टतमं गीतं चित्वा आस्वादनटीकां लिखत।**

दिशिदिशि किरति सजलकणजालं
नयननलिनमिव विगलितनालम्।।
त्यजति न पाणितलेन कपोलम्
बालशशिनमिव सायमलोलम्।।
नयनविषयमपि किसलयतल्पम्
कलयति विहितहुताशनकल्पम्।

**ख) वृद्धसंरक्षणस्य प्राधान्यमधिकृत्य लघुटिप्पणीं लिखत ।**

**III प्रदत्तं गद्यभागं पठित्वा अधो निर्दिष्टानां प्रश्नानाम् उत्तराणि लिखत।**

मातुः पक्षान्तः निद्रासुखमनुभूयमानाः वयं यथाकथञ्चित् सुप्तोत्थिताः। पितरौ भोजनमन्विष्य गतौ। तयोः आगमनकालं यावत् वृक्ष एव पितरौ । स अस्मान् पोतकानिव संरक्षति स्म।

मम अनुजानां शब्दं श्रुत्वा एव नीडात् बहिरागता । वृक्षस्य अधः तण्डुलान् प्रसृतान् यदृच्छया अपश्यम्।

तण्डुलान् आहर्तुम् उद्युक्तायां 'हा हतोऽस्मि' इति रुदितमश्रौषम्। वृक्षस्य एका शुष्कशाखा कस्यचित् जालधारिणः लुब्धकस्य शिरसि अपतत् इव।

**क)** 1. भोजनमन्विष्य गतौ कौ? **(3 x 2= 6)**

2. पोतकानिव अस्मान् संरक्षति - कः?

3. वृक्षस्य अधः किम् अपश्यम्?

**ख)** गद्यांशे विद्यमानं क्त्वान्त - ल्यबन्त - तुमुन्नन्त अव्ययानि चित्वा लिखत। **(1 x 3 = 3)**

**ग)** गद्यांशस्य आशयं स्ववाक्यैः संगृह्य लिखत। **(1 x 6 = 6)**

**घ)** गद्यभागं पठित्वा उचितं शीर्षकं लिखत। **(1 x 1 = 1)**

**IV. उदाहरणानुसारं पदं विश्लेषयत।** **(3 x1 = 3)**

उदाः हरिरत्र = हरिः + अत्र ।

१. कविरयम्।

२. रविरत्र।

३. मुनिरपि।

**V. श्लोकं पठित्वा गद्यक्रमं पूरयत।** **(1 x 4 = 4)**

यहूदबालकैरन्यैः क्वापि क्रीडारतस्तथा
क्वापि चिन्तापरः सर्वैरलक्ष्यत स बालकः।।

स .................... अन्यैः .................. क्रीडारतः तथा क्वापि............ च सर्वैः ............।

**VI. अधोनिर्दिष्टयोः प्रश्नयोः एकस्य उत्तरं निर्देशानुसारं लिखत ।** **(1 x 6= 6)**

**क) खण्डिकां पठित्वा प्रदत्तेषु प्रश्नवाचकशब्देषु त्रीणि उपयुज्य प्रश्नवाक्यानि लिखत।**

पुत्रः स्नुषा च कार्यालयात् सोपानमार्गेण बहिरागच्छति । पुत्रः अग्रे, पत्नी पृष्ठतः च । पुत्रः चिन्तामग्नः देहलीतः अवरोहति । पत्नी अस्वस्था इव ।

(का, केन, कुत्र , कः)

**ख) सूचनानुसारं विरहिण्या राधायाः अवस्थामधिकृत्य टीकां लिखत ।**

(टीका - ലഘുവിവരണം)

सूचनाः - आवासो विपिनायते - हारं भारं मनुते - विषमिव पश्यति ।

**VII. प्रदत्तं श्लोकं पठित्वा प्रश्नयोः उत्तराणि लिखत।**

**क) श्लोकं पठित्वा प्रस्तुतपदानां स्थाने अप्रस्तुतपदानि योजयित्वा लिखत।** **(1 x 4 = 4)**

आवासो विपिनायते प्रियसखीमालापि जालायते
तापोऽपि श्वसितेन दावदहनज्वालाकलापायते।
सापि त्वद्विरहेण हन्त हरिणीरूपायते हा कथं
कन्दर्पोऽपि यमायते विरचयञ्छार्दूलविक्रीडितम् ।।

| प्रस्तुतानि। | अप्रस्तुतानि |
|---|---|
| आवासः | विपिनम् |
| प्रियसखीमाला | |
| तापः | |
| राधा | |
| कन्दर्पः | |

**ख) श्लोकस्य आशयं लिखत।** **(1 x 4 = 4)**

**VIII. प्रादेशिकभाषया आङ्गलभाषया वा अनुवदत।** **(1 x 5= 5)**

भवन्तः गच्छन्तु, नाहमधुना आगच्छामि। अस्य दयनीयाम् अवस्थां विचिन्त्य कथमेतं त्यक्त्वा गन्तुं शक्नुमः। एषः सर्वदा अस्मान् परित्रातुं व्यग्रः आसीत्। तत्सर्वं विस्मृत्य आपदि एनम् अनादृत्य गन्तुं नाहं समर्था। "गच्छन्तु सर्वे गच्छन्तु।"

**IX. अधोदत्तयोः प्रश्नयोः एकस्य उत्तरं लिखत ।** **(1 x 6 = 6)**

**क) पटकथां लिखत।**

सः वाल्मीकिः तमसानद्याः तीरे आश्रमे वसन् अवर्तत । तत्र एकदा क्रौञ्चमिथुनस्य पुंसः हन्तारं निषादं "त्वं शाश्वतीं प्रतिष्ठां मा गमः" इति शशाप। ततः ब्रह्मदेवस्य निर्देशानुसारं रामायणं रचयामास ।

**ख) पेटिकातः पदानि उपयुज्य त्रीणि वाक्यानि रचयत ।**

| | | |
|---|---|---|
| बालकः<br>शारिका<br>सालारः | नीडे<br>वृद्धसदनम्<br>विद्यालयम् | गच्छति<br>वसति<br>भवति |

**X. उदाहरणानुसारं योजयत।** **(2 x 2 = 4)**

उदाहरणम् - विद्यालयं गच्छति। पाठं पठति।

विद्यालयं गत्वा पाठं पठति ।

1. पुस्तकं पश्यति। पाठं वाचयति।
2. स्नानं करोति। ईश्वरं वन्दते।

**XI. कथांशान् क्रमीकृत्य कथास्तम्भं रचयत।** **(1 x 6 = 6)**

a) वृक्षाः सम्पुष्टः अभवन्।

b) एका शारिका वृक्षं त्यक्त्वा गन्तुं अशक्ता।

c) व्याधस्य शरेण वृक्षः विद्धः विषबाधितः च।

d) शुष्कं वृक्षं त्यक्त्वा सर्वे गताः।

e) शारिकायाः आर्द्रतायां सन्तुष्टा तापसी वृक्षं शारिकां च अनुगृह्णाति।

f) कश्चन सर्पः व्याधस्य पादयोरन्तरेण झटिति असरत्।

**XII. संस्कृतभाषायाम् अनुवदत।** **(3 x 2= 6)**

1) കേരളം പ്രകൃതിരമണീയമായ സംസ്ഥാനമാണ്.

2) ശ്രീശങ്കരന്റെ ജന്മദേശം കാലടിയാണ്.

3) സംസ്കൃതപഠനം ശാസ്ത്രജ്ഞാനത്തെ വർദ്ധിപ്പിക്കുന്നു.

**XIII. यथोचितं योजयत।** **(5 x 1= 5)**

| | | |
|---|---|---|
| 1) सोपानसङ्गीतम् | - | जोसफ्। |
| 2) शुककथा | - | सालारः। |
| 3) मुनिः | - | पी.सी. देवस्या |
| 4) वृद्धसदनम् | - | महाभारतम्। |
| 5) क्रिस्तुभागवतम् | - | गीतगोविन्दम् । |